myCBSEguide.com
A Complete guide for CBSE students

# संस्कृतम् (सम्प्रेषणाधारितम्)

**निर्धारित समय : 3 घण्टे** **अधिकतम अंक : 100**

*निर्देशाः :*

1. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
2. प्रतिखण्डम् उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।
3. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
4. प्रश्नपत्रे उत्तराणि न लेखनीयानि।
5. प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
6. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

## प्रश्न पत्र संख्या 52/1

खण्डः 'क' 15 अङ्काः

**अपठितांश-अवबोधनम् (अपठित - अवबोधनम्)**

1. अधोलिखितम् **अनुच्छेदद्वयं** पठित्वा प्रदत्तप्रश्नान् उत्तरत-

(अ) **प्रथमः अनुच्छेदः**

अस्माकं भारतस्य संस्कृतिः प्रतीक-प्रधाना संस्कृतिः अस्ति। अस्माकम् अनेकानि प्रतीकचिह्नानि सन्ति। यथा दीपकः प्रकाशस्य प्रतीकम् अस्ति। चक्रं समयस्य प्रतीकं मन्यते। स्वस्तिचिह्नं कल्याणस्य प्रतीकम्। अस्माकं संविधानद्वारा अपि अनेकानि चिह्नानि स्वीकृतानि। अस्माकं राष्ट्रपक्षी मयूरः अस्ति, राष्ट्रीयः पशुः सिंहः राष्ट्रीयं पुष्पं च कमलम्।

अस्माकं भारतमाता मातुः प्रतीकम् अस्ति। अस्माकम् अनेके राष्ट्रीयाः दिवसाः अपि सन्ति। स्मरणीयाः एते दिवसाः।

प्रश्नाः

I. एकपदेन उत्तरत। ½×2 = 1

(i) दीपकः कस्य प्रतीकम् अस्ति?

(ii) अस्माकं राष्ट्रपुष्पं किम्?

myCBSEguide.com
A Complete guide for CBSE students

II पूर्णवाक्येन उत्तरत। 1×2 = 2

(i) भारतीयसंस्कृतिः कीदृशी अस्ति?

(ii) भारतमाता कस्याः प्रतीकम् अस्ति?

III. यथानिर्देशम् उत्तरत। ½×4 = 2

(i) 'स्मरणीयाः दिवसाः' इति पदयोः विशेषणपदं किम्?

(ii) 'बहूनि' इति अर्थे अनुच्छेदे किं पदं प्रयुक्तम्?

(iii) 'चक्रं सत्यस्य प्रतीकं मन्यते।' इति वाक्ये क्रियापदं किम्?

(iv) 'अन्धकारस्य' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम्?

**(ख) द्वितीयः अनुच्छेदः**

एकं सुन्दरं विशालं च उपवनम्। तस्मिन् सुन्दरे उपवने फलानाम् अनेके वृक्षाः आसन्। एकदा एकः जम्बूकः अत्र-तत्र भ्रमित्वा उपवनम् आगच्छत्। सः अतीव बुभुक्षितः आसीत्। उपवने सः द्राक्षालतां पश्यति। तस्यां लतायाम् अनेकानि द्राक्षाफलानि आसन्। कानिचित् पक्वानि द्राक्षाफलानि आसन् कानिचित् च अपक्वानि। तानि दृष्ट्वा सः जम्बूकः अचिन्तयत्-'अद्य तु अहम् एतानि द्राक्षाफलानि खादिष्यामि।' द्राक्षाफलानि प्राप्तुं सः उपरि-उपरि कूर्दते परन्तु द्राक्षाफलानि प्राप्तुं सः सफलः न अभवत्। सः पुनः-पुनः उत्पतति परन्तु पुनः-पुनः असफलः अभवत्। सः कुपितः भवति। सः द्राक्षाफलानि दृष्ट्वा कथयति - 'एतानि द्राक्षाफलानि अम्लानि सन्ति।' अनन्तरं सः ततः स्वस्थानं गच्छति।

**प्रश्नाः**

I. एकपदेन उत्तरत। 1×2 = 2

(i) जम्बूकः उपवने किं पश्यति?

(ii) किं जम्बूकः द्राक्षाफलानि प्राप्तुं सफलः अभवत्?

II. पूर्णवाक्येन उत्तरत। 2×2 = 4

(i) फलानाम् अनेके वृक्षाः कुत्र आसन्?

(ii) द्राक्षाफलानि प्राप्तुं जम्बूकः किं करोति?

myCBSEguide.com
A Complete guide for CBSE students

III. यथानिर्देशम् उत्तरत। ½×4 = 2

(i) 'विशालम् उपवनम्' इति पदयोः विशेष्यपदं किम्?

(ii) 'नीचै-नीचैः' इति अव्ययपदस्य किं विपरीत-अव्ययपदम् अत्र प्रयुक्तम्?

(iii) 'सः कुपितः भवति।' इति वाक्ये कर्तृपदं किम् अस्ति?

(iv) 'पश्चात्' इति अर्थे अस्मिन् अनुच्छेदे किं पदं प्रयुक्तम्?

IV. अस्य अनुच्छेदस्य कृते एकम् उपयुक्तं शीर्षकं लिखत। 2×1=2

**खण्डः 'ख'** **20 अङ्काः**

**रचनात्मककार्यम्**

2. पित्रा पुत्रीं प्रति लिखितम् अधोपत्रं मञ्जूषायां प्रदत्तपदैः पूरयत

(i) ----------------

(ii) ---------------

(iii) ---------------

मन्ये यत् भवती तत्र कुशलिनी इति। अत्र गृहे सर्वे (iv) ------------------- सन्ति। तव जननी त्वां सर्वदा (v) --------------। तव भ्राता राष्ट्रीयस्तरस्य क्रीडासु भागं स्वीकर्तुं गतः। सः अग्रिमसप्ताहे आगमिष्यति। भवत्याः (vi) -------------------- कदा भविष्यति? भवती गृहं कदा आगमिष्यति? अध्ययनं तु सम्यक् चलति इति (vii) ----------------------! इदानीम् (viii) ---------------------- कथम् अस्ति? सर्वेभ्यः मम शुभकामना। अन्यत् सर्वं कुशलम्। (ix) ---------------------- लिखतु।

भवदीयः (x) ---------------,

प्रकाशचन्द्रः।

**मञ्जूषा**

| |
|---|
| स्वास्थ्यम्, श्रीनगरतः, कुशलिनः, विश्वसिमि, पिता, प्रियपुत्रि!, स्मरति, ग्रीष्मावकाशः, शुभाशिषः, पत्रम्। |

3. **संवादलेखनम् :** **1×5 = 5**

अधोलिखितं संवादं मञ्जूषाप्रदत्तपदसहायतया पूरयित्वा पुनः लिखत :

कुमारः - महोदये! नमस्कारः।

myCBSEguide.com
A Complete guide for CBSE students

शालिनी - नमस्कारः। सुस्वागतम्। आगच्छतु। उपविशतु। किम् इच्छति?

कुमारः - (1) ---------------------------------------------

शालिनी - एवं न वदतु। किमपि अवश्यं स्वीकरणीयम्।

कुमारः - मम इच्छा न अस्ति।

शालिनी - (2) ----------------------------------------------------------------------

कुमारः - यदि एवं तर्हि एकं सेवफलं यच्छतु।

शालिनी - अनुगृहीता अस्मि। (3) ----------------------------------------------------

कुमारः - तावत्पर्यन्तम् अद्यतनं समाचारपत्रं पठामि।

शालिनी - (सेवफलम् आनीय कुमाराय यच्छति) खादतु। कथम् अस्ति?

कुमारः - (4) ----------------------------------------------------

शालिनी - स्वास्थ्यवर्धकं सेवफलं प्रतिदिनं खादितव्यम् इति श्रूयते।

कुमारः - अहं प्रतिदिनम् एकं सेवफलम् अवश्यम् खादामि।

शालिनी - किञ्चित् अधिकम् इच्छति?

शशाङ्कः - (स्वीकृत्य) बहु स्वादिष्टम्। केन निर्मितम्।

कुमारः - (5) ------------------------------------------। अधुना गच्छामि। नमस्कारः।

शालिनी - नमस्करोमि, गच्छतु भवान् पुनर्दर्शनाय।

**मञ्जूषा**

1. गत्वा सेवफलम् आनयामि।
2. अतीव मधुरम्।
3. नहि, पर्याप्तम्।
4. अहं किमपि न इच्छामि।
5. दूरतः समागतो भवान् किञ्चित्तु ग्रहीतव्यमेव।

myCBSEguide.com
A Complete guide for CBSE students

4. **चित्रवर्णनम् :** **2×5 = 10**

अधोदत्तचित्रस्य वर्णनं मञ्जूषायां प्रदत्तपदानां सहायतया पञ्चसु संस्कृतवाक्येषु कुरुत -



**मञ्जूषा**

| |
|---|
| चित्रम्, चित्रे, अस्ति, सन्ति, सुन्दरम्, हरिणः, शशकः, कच्छपः, वृक्षाः, पक्षिणः, तडागे, पुष्पाणि,मीनाः, पर्वताः, मण्डूकः, चन्द्रः, आकाशे, पर्वतीयस्थलस्य, इदम्, पादपाः, पश्यति। |

**अथवा**

**केवलं प्रज्ञाचक्षुर्भ्यः** **2×5 = 10**

मञ्जूषायां प्रदत्तपदानां साहाय्येन निम्नलिखितविषयम् अधिकृत्य पञ्चसंस्कृतवाक्येषु एकम् अनुच्छेदं लिखत -

मम राष्ट्रम् भारतवर्षम्

**मञ्जूषा**

| |
|---|
| प्राचीनं, महान्, देशः, विशालः, मातृभूमिः, प्रजातान्त्रिकं, राज्यानि, विविधाः भाषाः, वैविध्यमयी संस्कृतिः, उत्तरे, दक्षिणे, विशालः हिमालयः, समुद्रः, षड् ऋतवः, मिलित्वा, ऐक्यम्, सन्ति, अस्ति, भवति, वसन्ति, उत्सवाः। |

myCBSEguide.com
A Complete guide for CBSE students

**खण्डः ग** **30 अङ्काः**

**अनुप्रयुक्तव्याकरणम्**

5. अधोलिखितावाक्येषु रेखाङ्किकतपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा लिखत : 1×3 = 3

(i) धन + आगमनं श्रुत्वा।

(ii) सन्मित्रं कस्य हितं न करोति?

(iii) अश्वः गजः + च मिलित्वा धावतः।

6. अधोलिखितवाक्येषु रेखाङ्कितपदेषु समासं विग्रहं वा विधाय लिखत : 1×4 = 4

(i) मृगाः वनस्य क्षेत्रे कूर्दन्ते।

(ii) यत्र-तत्र क्रोधः च लोभः च तत्र-तत्र कुत्र शान्तिः?

(iii) इदं सचित्रं पुस्तकम् अस्ति।

(iv) दशाननः अभिमानी राजा आसीत्।

7. अधोलिखितवाक्येषु कोष्ठकान्तर्गतानां पदानां प्रकृति-प्रत्ययौ योजयित्वा लिखत : 1×5 = 5

(i) पुस्तकालये पुस्तकम् उच्चैः न -------------------- । (पठ् + तव्यत्)

(ii) शीघ्रं -------------------- अश्वः अधुना शनैः-शनैः धावति। (धाव् + शतृ)

(iii) -------------------- मनुष्यः किं कर्तुं न समर्थः? (शक्ति + मतुप्)

(iv) -------------------- एव सर्वत्र पूजनीया। (मानव + तल्)

(v) सा स्वभावेन अतीव -------------------- अस्ति। (सरल + टाप्)

8. अधोलिखितवाक्येषु रिक्तस्थानानि उचित-अव्ययपदैः मञ्जूषा-पद-सहायतया पूरयित्वा लिखत : 1×5 = 5

(i) ताः पठितुं -------------------- गमिष्यन्ति।

(ii) -------------------- त्वं गायसि तथा अहं गातुं न समर्थः।

(iii) उच्चैः -------------------- हस।

(iv) सः -------------------- अपि आगच्छत्।

(v) यूयम् अत्र क्रीडितुं -------------------- आगच्छथ?

**मञ्जूषा**

| |
|---|
| ह्यः, मा, श्वः, कदा, यथा। |

myCBSEguide.com
A Complete guide for CBSE students

9. अधोलिखितसंवादे रिक्तस्थानानि वाच्यानुसारं पूरयत : 1×3 = 3

सुमेधा - सुधीर! अधुना त्वं किं करोषि?

सुधीरः - सुमेधे! अधुना तु मया किमपि न क्रियते। त्वं किं करोषि?

सुमेधा - मया अपि किमपि न (i) -------------- परन्तु एकं पुस्तकं पठितुम् इच्छामि।

सुधीरः - शोभनम्। त्वं (ii) ------------------------- पठितुम् इच्छसि। पठतु। गच्छामि।

सुमेधा - पठामि परन्तु त्वं कुत्र गच्छसि?

सुधीरः - (iii) ------------------------------- भ्रमणाय उद्यानं गच्छामि।

लेखा - शोभनम्। गच्छतु।

10. अधोलिखिते कार्यक्रमे अङ्कानां स्थाने समयं संस्कृतपदेषु लिखत: 1×4 = 4

विद्यालये सङ्गीतसभायाः कार्यक्रमः

प्रातः __10.30__ वादने उद्घाटनम्।

प्रातः __10.45__ वादने कार्यक्रमस्य परिचयः।

प्रातः __11.15__ वादने सङ्गीतवादनम्।

सायङ्काले __4.00__ वादने समापनम्।

11. अधोलिखितवाक्येषु अङ्कानां स्थाने संस्कृत-संख्यावाचक-विशेषणानि प्रयुज्य उत्तराणि लिखत : ½×4 = 2

(i) वने __2__ सिंहौ अत्र-तत्र भ्रमतः।

(ii) मम वाटिकायाम् __1__ विशालद्राक्षालता अस्ति।

(iii) मम विद्यालये __60__ शिक्षकाः शिक्षिकाः च सन्ति।

(iv) अस्मिन् भवने __5__ जनाः वसन्ति।

12. अधोलिखितवाक्यानि संशोध्य लिखत : 1×4 = 4

(i) तत्र द्वे बालिके <u>पठन्ति</u>।

(ii) <u>ते</u> बालिकाः अत्र आगच्छन्ति।

(iii) अहम् अपि <u>लिखसि</u>।

(iv) सः ह्यः <u>गमिष्यति</u>।

myCBSEguide.com
A Complete guide for CBSE students

**खण्डः घ** **35 अङ्काः**

**पठित-अवबोधनम्**

13. अधोलिखितं गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत :

**(अ) गद्यांशः**

अथ पूर्वमित्रं दुष्टबुद्धिः प्रच्छन्नभाग्यस्य धनागमवृत्तान्तं श्रुत्वा कदाचित् मध्यरात्रे तस्य एव गृहे चौर्यार्थं सन्धि-खननसुयोगम् विलोकयन् स्थितः। तस्मिन्नेव काले सुप्तोत्थितः प्रच्छन्नभाग्यः सम्भ्रान्तचित्तः स्वपत्नीं सम्बोध्य उवाच अहो विचित्रः स्वप्नो मया दृष्टः। अस्माकं क्षेत्रे अश्वत्थतरुमूले सुवर्णपूरितः कलशः विद्यते इति। तच्छ्रुत्वा परद्रव्ये अनासक्ता सा न्यवेदयत् - नाथ! विरम अस्माद् लोभात्।

**प्रश्नाः**

I. एकपदेन उत्तरत। ½×2 = 1

(i) दुष्टबुद्धिः कस्य धनागमवृत्तान्तं श्रुत्वा तस्य गृहं गच्छति?

(ii) अश्वत्थतरुमूले कीदृशः कलशः आसीत्।

II. पूर्णवाक्येन उत्तरत। 2×1 = 2

(i) परद्रव्ये अनासक्ता प्रच्छन्नभाग्यस्य पत्नी किं न्यवेदयत्?

III. यथानिर्देशम् उत्तरत। ½×4 = 2

(i) 'विचित्रः स्वप्नः' इति पदयोः विशेषणपदं किम्?

(ii) 'सुवर्णपूरितः कलशः विद्यते' इति वाक्यांशे क्रियापदं किम्?

(iii) 'अन्येषां धने' इति अर्थे अस्मिन् अनुच्छेदे किं पदं प्रयुक्तम्?

(iv) 'सा न्यवेदयत्' इति वाक्ये कर्तृपदं किम्?

**(आ) पद्यांशः**

न तथा शीतलसलिलं न चन्दनरसो न शीतला छाया।
प्रह्लादयति च पुरुषं, यथा मधुरभाषिणी वाणी।।

**प्रश्नाः**

I. एकपदेन उत्तरत। ½×2 = 1

(i) शीतलसलिलं कं तथा न प्रह्लादयति?

(ii) कीदृशी छाया मनुष्यं प्रसन्नं न करोति?

myCBSEguide.com
A Complete guide for CBSE students

II. पूर्णवाक्येन उत्तरत। 2×1 = 2

मधुरभाषिणी वाणी किं करोति?

III. यथानिर्देशं उत्तरत। ½×4 = 2

(i) 'शीतला छाया' इति पदयोः विशेषणपदं किम्?

(ii) 'प्रसन्नं करोति' इति अर्थे श्लोके किं पदं प्रयुक्तम्?

(iii) अस्मिन् श्लोके 'प्रह्लादयति' इति क्रियापदस्य कर्तृपदं किम्?

(iv) 'उष्णजलम्' इति पदस्य किं विपरीतपदम् श्लोके प्रयुक्तम्?

(इ) **नाट्यांशः**

मयूरः- (प्रविश्य साट्टहासम्) सत्यं सत्यम्। अहमेव राष्ट्रपक्षी। को न जानाति तव ध्यानावस्थाम्? मौनं धृत्वा वराकान् मीनान् छलेन अधिगृह्य, क्रूरतया भक्षयसि। धिक् त्वाम्! अवमानितं खलु सर्वं पक्षिकुलं त्वया।

काकः- रे सर्पभक्षक! नर्तनात् अन्यत् किम् अपरं जानासि?

मयूरः- श्रूयतां श्रूयताम्। मम नृत्यं तु प्रकृतेः आराधना पश्य! चारुवर्तुलचन्द्रिकाशोभितानां मम पिच्छानाम् अपूर्वं सौन्दर्यम्। मम केकारवं श्रुत्वा कोकिलः अपि लज्जते। मम शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एव अहं पक्षिराजः कृतः।

प्रश्नाः

I. एकपदेन उत्तरत। ½×2 = 1

(i) 'अहमेव राष्ट्रपक्षी- इति कः कथयति?

(ii) मयूरस्य नृत्यं कस्याः आराधना मन्यते?

II. पूर्णवाक्येन उत्तरत। 1×2 = 2

मयूरस्य केकारवं श्रुत्वा कः लज्जते?

III. यथानिर्देशम् उत्तरत। ½×4 = 2

(i) 'अपूर्वं सौन्दर्यम्' इति पदयोः विशेषणपदं किम्?

(ii) 'को न जानाति तव ध्यानावस्थाम्?' इति वाक्ये क्रियापदं किम्?

(iii) 'अहं पक्षिराजः कृतः।' इति वाक्ये 'अहं' सर्वनामपदं कस्मै प्रयुक्तम्?

(iv) 'ईश्वरेण' इत्यर्थे अस्मिन् नाट्यांशे किं पदं प्रयुक्तम्?

myCBSEguide.com
A Complete guide for CBSE students

14. अधोलिखित-पद्यद्वयस्य भावार्थम् उपयुक्तपदैः पूरयित्वा पुनः लिखतः 3+3 = 6

(क) य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।

न कुर्यादहितं कर्म सः परेभ्यः कदापि च।।

**भावार्थः**

यः मनुष्यः स्वकल्याणम् अनेकानि च (i)--------------------------------- इच्छति

तेन (ii) ---------------- कदापि अहितकरं (iii)---------------- न करणीयम्।

(ख) कस्य वशे प्राणिगणः? सत्यप्रियभाषिणो विनीतस्य।

क्व स्थातव्यम्? न्याय्ये पथि दृष्टादृष्टलाभाढ्ये।।

**भावार्थः**

अस्मिन् लोके यः सत्यवादी प्रियवादी च अस्ति (i) ---------------------------- तस्य एव (ii) ------------------- भवन्ति। मनुष्येण लाभम् अगणयित्वा न्यायपूर्णे मार्गे एव (iii) -----------------।

15. अधोलिखितपद्यद्वयस्य अन्वययोः रिक्तस्थानानि पूरयतः 1½+1½ = 3

(क) मित्ररूपाः हि रिपवः सम्भाष्यन्ते विचक्षणैः।

ये हितं वाक्यमुत्सृज्य विपरीतोपसेविनः।।

**अन्वयः**

ये (i)--------------------------- वाक्यम् उत्सृज्य (ii)--------------------------- (ते) विचक्षणैः मित्ररूपाः हि (iii) -------------- सम्भाष्यन्ते।

(ख) परमापद्गतेनापि नैव तात त्वया रणे।

इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः।।

**अन्वयः**

(i) ------------- ! परम-आपद्गतेन अपि त्वया रणे इदम् अस्त्रं विशेषतः (ii)------------- न एव (iii)----------------।

16. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत। 1x4 = 4

(i) <u>अरुणाचलप्रदेशस्य</u> राजधानी ईटानगरम् अस्ति।

(ii) संवत्सरे <u>षड्</u> ऋतवः भवन्ति।

myCBSEguide.com
A Complete guide for CBSE students

(iii) <u>क्रोधात्</u> भवति संमोहः।

(iv) राजा <u>तान्</u> उवाच।

17. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं लिखत। ½x8 = 4

(i) विचित्रा खलु दैवगतिः। विषधरः दुष्टबुद्धिं दष्टवान्।

(ii) द्वे मित्रे कुपथेन धनं प्राप्तुं ग्रामान्तरम् अगच्छताम्।

(iii) सः कृषिक्षेत्रे हलकार्यं कृत्वा श्रमेण प्रभूतं धनम् अर्जितवान्।

(iv) दुष्टबुद्धिः अश्वत्थमूलं खनित्वा सुवर्णकलशं प्राप्तवान्।

(v) दुष्टबुद्धिः इदं श्रुत्वा शीघ्रं तत् क्षेत्रं गच्छति।

(vi) मार्गे एकया घटनया समुपजातविवेकः प्रच्छन्नभाग्यः स्वगृहं प्रतिनिवृत्तः।

(vii) इदं ज्ञात्वा दुष्टबुद्धिः चौर्यार्थं तस्य गृहम् अगच्छत्।

(viii) तत्र सः श्रृणोति 'अहो विचित्रः स्वप्नः मया दृष्टः। अस्माकं क्षेत्रे अश्वत्थतरुमूले सुवर्णपूरितः कलशः विद्यते इति।'

18. निम्नलिखितवाक्येषु रेखाङ्कितपदानाम् उचितम् अर्थं चित्वा लिखत :

(क) <u>माधुर्यम्</u> अक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।

(i) श्रवणमधुरता

(ii) शर्करायुक्तम्

(iii) मधुरवस्तु।

(ख) का सुखदा? <u>साधुजनमैत्री</u>।

(i) अन्येभ्यः सुखदानम्

(ii) सुखेन वसनम्

(iii) सज्जनानां मित्रता।

(ग) अहो धृतिः! अहो <u>सत्त्वम्</u>! अहो सत्त्वहितैषिता।

(i) अस्तित्वम्

(ii) मूलतत्त्वम्

(iii) साहसम्।

myCBSEguide.com
A Complete guide for CBSE students

# प्रश्न पत्र संख्या 52

खण्डः 'क' 15 अङ्काः

**अपठितांश-अवबोधनम् (अपठित - अवबोधनम्)**

1. अधोलिखितम् **अनुच्छेदद्वयं** पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत-

(अ) **प्रथमः अनुच्छेदः**

जनानां लोकानां वा तन्त्रं जनतन्त्रम् लोकतन्त्रं वा कथ्यते। लोकतन्त्रे जनानां कल्याणम् एव शासनस्य प्रमुखं कार्यं मन्यते। अत्र प्रत्येकं जनस्य एव महत्त्वं प्रमुखम्। भाषणे लेखने च अत्र पूर्णं स्वातन्त्र्यम् भवति। व्यवहारे केचन दोषाः अपि दृश्यन्ते। एतेषां दोषाणां दूरीकरणम् अनिवार्यम्। एतदर्थं सर्वेभ्यः शिक्षा अनिवार्या। शिक्षां विना लोकतन्त्रं सुरक्षितं न भवति।

प्रश्नाः

I. एकपदेन उत्तरत। ½×2 = 1

(i) लोकतन्त्रे केषां कल्याणं शासनस्य प्रमुखं कार्यं भवति?

(ii) लोकतन्त्रे दोषान् दूरीकर्तुं किम् अनिवार्यम् अस्ति?

II पूर्णवाक्येन उत्तरत। 1×2 = 2

(i) लोकतन्त्रे कस्य महत्त्वं प्रमुखम्?

(ii) कां विना लोकतन्त्रं सुरक्षितं न भवति?

III. यथानिर्देशम् उत्तरत। ½×4 = 2

(i) 'प्रमुखं कार्यम्' इति पदयोः विशेषणपदं किम्?

(ii) 'जनानां शासनं जनतन्त्रं कथ्यते' इति वाक्ये क्रियापदं किम्?

(iii) 'जनतन्त्रम्' इति पदस्य किं पर्यायपदम् अत्र प्रयुक्तम्?

(iv) 'गुणानाम्' इति पदस्य किं विलोमपदम् अस्मिन् अनुच्छेदे प्रयुक्तम्?

(ख) **द्वितीयः अनुच्छेदः**

चाणक्यः मगधदेशस्य नृपस्य मन्त्री आसीत्। सः एकस्मिन् उटजे वसति स्म। एकदा राजा दरिद्रेभ्यः दातुं चाणक्याय कम्बलान् अयच्छत्। चाणक्यस्य उटजः नगराद् बहिः आसीत्। केचन चौराः कम्बलान् चोरयितुं चाणक्यस्य उटजम् आगच्छन्। शीतकालः आसीत् परन्तु चाणक्यः कम्बलं विना एव भूमौ सुप्तः आसीत्। समीपे अनेके कम्बलाः आसन्। चौराः आश्चर्यचकिताः अभवन्। ते अचिन्तयन् -- "अत्र तु अनेके कम्बलाः

myCBSEguide.com
A Complete guide for CBSE students

सन्ति परन्तु एषः कम्बलं विना एव निद्रां करोति।'' ते चाणक्यं प्रबोधितवन्तः अपृच्छन् च -- ''अत्र तु अनेके कम्बलाः सन्ति, शैत्यम् अपि अस्ति तथापि त्वं भूमौ एव कम्बलं विना किमर्थं शयनं करोषि।'' चाणक्यः अवदत् -- 'एते कम्बलाः दरिद्रेभ्यः दातव्याः इति राज्ञः आज्ञा अस्ति। एते मम कृते न सन्ति।' इदं श्रुत्वा चौराः अपि सज्जनाः अभवन्। अन्येषां द्रव्यस्य उपयोगः अधर्मः इति चाणक्यस्य सन्देशः।

**प्रश्नाः**

I. एकपदेन उत्तरत। 1×2 = 2

(i) राजा चाणक्याय किम् अयच्छत्?

(ii) चौराः किम् अभवन्?

II. पूर्णवाक्येन उत्तरत। 2×2 = 4

(i) चाणक्यः कस्य मन्त्री आसीत्?

(ii) चाणक्यः कम्बलं विना कुत्र सुप्तः आसीत्?

III. यथानिर्देशम् उत्तरत। ½×4 = 2

(i) 'अनेके कम्बलाः' इति पदयोः विशेष्यपदं किम् अस्ति?

(ii) अस्मिन् अनुच्छेदे 'अन्तः' इति अव्ययस्य किं विलोम-अव्ययपदं प्रयुक्तम्?

(iii) 'धनस्य' इति अर्थे अत्र किं पदं प्रयुक्तम्?

(iv) 'चौराः आश्चर्यचकिताः अभवन्' इति वाक्ये कर्तृपदं किम्?

IV. अस्य अनुच्छेदस्य कृते एकम् उपयुक्तं शीर्षकं संस्कृतेन लिखत। 2

**खण्डः 'ख'** **20 अङ्काः**

**रचनात्मककार्यम्**

2. अनुजं प्रति लिखितम् निम्नपत्रं मञ्जूषायां प्रदत्तपदैः पूरयत :

(i) ----------------

(ii) ---------------

(iii) ---------------

अत्र सर्वं कुशलम् अस्ति। गृहे अपि सर्वं (iv) ------------------- इति मातुः पत्रेण ज्ञातम्। भवान् स्वकार्याणि (v) -------------- करोति इति ज्ञात्वा प्रसन्नः अस्मि। भवान्

myCBSEguide.com
A Complete guide for CBSE students

अद्यत्वे सङ्गीतम् अपि पठन् (vi) -------------------- इति ज्ञातम्। हर्षस्य विषयः। सङ्गीतं तु अनुशासनस्य पर्यायः। अधिकाधिकम् (vii) ---------------------- करोतु। मया इदम् अपि (viii) ---------------------- यत् भवान् केषुचित् (ix) ---------------------- काठिन्यम् अनुभवति। चिन्तां मा करोतु, अहम् अग्रिमे सप्ताहे गृहम् आगमिष्यामि। भवन्तं पाठयित्वा काठिन्यं दूरीकरिष्यामि।

मातापितृ-चरणेषु प्रणामाः। अनुजायै शुभाशिषः।

भवतः --------------- (x),

सुमनः।

**मञ्जूषा**

| |
|---|
| कुशलिनः, शुभाशिषः, छात्रावासतः, अग्रजः, विषयेषु, प्रिय अनुज!, दत्तचित्तेन, अस्ति, ज्ञातम्, अभ्यासम्। |

3. **संवादलेखनम् :** **1×5 = 5**

अधोलिखितं संवादं मञ्जूषाप्रदत्तपदसहायतया पूरयित्वा पुनः लिखत :

शशाङ्कः - मातः! बहु विलम्बः जातः। किम् अभवत्?

माता - आम्। अवकाशकारणात् यानम् शीघ्रं न प्राप्तम्।

शशाङ्कः - भवती श्रान्ता प्रतीयते। (i) ------------------------------------------------

माता - यच्छतु। किञ्चित् शीतलं जलं यच्छतु।

शशाङ्कः - स्वीकरोतु। किञ्चित् मधुरं निम्बक-जलं यच्छानि।

माता - (ii) ------------------------------------------------------------------------

शशाङ्कः - भवती तु (iii) -------------------------------------------------------------

माता - किं त्वं जानासि कथं निर्मीयते?

शशाङ्कः - न जानामि परन्तु (iv) ------------------------------------------------------

माता - शोभनम्। निर्दिशामि। करोतु।

शशाङ्कः - निर्मितम्। स्वीकरोतु। कथम् अस्ति!

माता - बहु स्वादिष्टम्। भगिन्यै अपि यच्छतु।

myCBSEguide.com
A Complete guide for CBSE students

भगिनी - (स्वीकृत्य) बहु स्वादिष्टम्। केन निर्मितम्।

शशाङ्कः - मया।

भगिनी - (v) ------------------------------------------------------------------------

शशाङ्कः - सत्यम् कथयामि। मया एव निर्मितम्। मातरं पृच्छतु।

माता - सत्यम्। अनेन एव निर्मितम्।

**मञ्जूषा**

1. अधुना न। किञ्चित् कालपश्चात् स्वयमेव निर्मामि।
2. हुँ! भवता! किं भवान् जानाति।
3. किं शीतलं जलं यच्छेयम्?
4. सदैव निर्माति। अद्य अहं निर्मामि।
5. भवती निर्दिशतु।

4. **चित्रवर्णनम् :** **2×5 = 10**

पञ्चसु संस्कृतवाक्येषु मञ्जूषापदसहायतया अधोलिखितं चित्रवर्णनं कुरुत :



myCBSEguide.com
A Complete guide for CBSE students

**मञ्जूषा**

| |
|---|
| चित्रम्, वृक्षाः, बालाः, सन्ति, हंसः, बकः, अजा, पक्षिणः, अस्ति, उपवनस्य, मीनाः, सरोवरः, तरन्ति, सरोवरे, कूजन्ति, वृक्षे, अस्ति, सुन्दरम्, वृक्षे, प्रसन्नाः, चलति, तरति। |

**अथवा**

**केवलं प्रज्ञाचक्षुर्भ्यः** **2×5 = 10**

मञ्जूषायां प्रदत्तपदानां साहाय्येन निम्नलिखितविषयम् अधिकृत्य पञ्चसंस्कृतवाक्येषु एकम् अनुच्छेदं लिखत :

"आचारः परमो धर्मः"

**मञ्जूषा**

| |
|---|
| मनुष्याः, सज्जनाः, व्यवहारशीलाः, सदाचारः, सज्जनानां, आचारः, सदाचारेण, सन्ति, बुद्धिं, धनं, यशः, मनुष्यः, प्राप्नोति, उन्नत्यै, पालनीयः, सत्यम्, उक्तम्, सज्जनेषु, सदगुणाः। |

**खण्डः ग** **30 अङ्काः**

**अनुप्रयुक्तव्याकरणम्**

5. अधोलिखितावाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा लिखत : 1×3 = 3

(i) देशान्त<u>रेभ्योऽपि</u> लोकाः आयान्ति।

(ii) संस्कृतस्य <u>वाक् + मयस्य</u> वैविध्यम् आश्चर्यजनकम्।

(iii) कः <u>बालः + तत्र</u> स्थास्यति।

6. अधोलिखितवाक्येषु रेखाङ्कितपदेषु समासं विग्रहं वा विधाय लिखत : 1×4 = 4

(i) उत्सवः <u>विद्यालयस्य भवने</u> एव भविष्यति।

(ii) <u>मातापितरौ</u> सदैव वन्दनीयौ।

(iii) ते <u>यथाशक्ति</u> कार्यं कुर्वन्ति।

(iv) <u>बहूनि फलानि यस्मिन् सः</u> वृक्षः अत्र एव अस्ति।

7. अधोलिखितवाक्येषु कोष्ठकान्तर्गतानां पदानां प्रकृति-प्रत्ययौ योजयित्वा पुनः लिखत : 1×5 = 5

(i) कार्यं सदैव परिश्रमेण -------------------- । (कृ + तव्यत्)

(ii) शनैः-शनैः -------------------- बालकः अत्र-तत्र भ्रमति। (चल + शतृ)

myCBSEguide.com
A Complete guide for CBSE students

(iii) -------------------- मनुष्यः सर्वेषां चित्तं हरति। (बुद्धि + मतुप्)

(iv) उद्यानस्य -------------------- दर्शनीयम् अस्ति। (विशाल + त्वं)

(v) -------------------- श्यामा अद्य आगमिष्यति। (श्रीमत् + ङीप्)

8. अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषायां प्रदत्त-अव्ययानां सहायतया पूरयत : 1×5 = 5

(i) ते अत्र -------------------- आगमिष्यन्ति।

(ii) भवान् अधुना गृहात् -------------------- गन्तुम् इच्छति।

(iii) यदा अहं वदामि -------------------- भवान् अपि।

(iv) सः तत्र -------------------- एकं पत्रम् अलिखत्।

(v) परिश्रमेण -------------------- कुत्र साफल्यम्।

**मञ्जूषा**

| |
|---|
| ह्यः, तदा, विना, श्वः, बहिः। |

9. अधोलिखितसंवादे रिक्तस्थानानि वाच्यानुसारं पूरयित्वा लिखत : 1×3 = 3

लेखा - श्यामे! किं त्वम् अधुना पत्रं लिखसि?

श्यामा - आम्, मया अधुना एकं पत्रं लिख्यते।

लेखा - किं त्वं मातरं प्रति पत्रं (i) ------------------------------------------------?

श्यामा - आम, (ii) ------------------------------------------ मातरं प्रति पत्रं लिख्यते।

लेखा - शोभनम्। अहम् अपि एकं पत्रं लिखामि।

श्यामा - त्वं पत्रं कं प्रति लिखसि?

लेखा - अहं (iii) ------------------------------------------ पितरं प्रति लिखामि।

10. अधोलिखितायां समयसारिण्याम् अङ्कानां स्थाने संस्कृतपदेषु समयम् लिखत: 1×4 = 4

विद्यालये नाट्योत्सवस्य कार्यक्रमः

प्रातः (i) 11.00 वादने उद्घाटनम्।

प्रातः (ii) 11.15 वादने उत्सवस्य परिचयः।

प्रातः (iii) 11.45 वादने नाटकानां प्रदर्शनम्।

सायङ्काले (iv) 4.30 वादने समापनम्।

myCBSEguide.com
A Complete guide for CBSE students

11. अधोलिखितवाक्येषु अङ्कानां स्थाने संस्कृत-संख्यावाचक-विशेषणपदानि प्रयुज्य उत्तराणि लिखत : ½×4 = 2

(i) उपवने ___3___ मयूराः नृत्यन्ति।

(ii) मम विद्यालये ___1___ द्राक्षालता अस्ति।

(iii) वाटिकायां ___40___ वृक्षाः सन्ति।

(iv) क्रीडाक्षेत्रे ___5___ बालिकाः क्रीडन्ति।

12. अधोलिखितवाक्यानि संशोध्य पुनः लिखत : 1×4 = 4

(i) केचन बालकाः अत्र <u>पठति</u>।

(ii) <u>सः</u> बालिका अत्र न अस्ति।

(iii) यूयं कुत्र <u>गच्छामः</u>?

(iv) सा श्वः तत्र <u>अगच्छत्</u>।

**खण्डः घ** **35 अङ्काः**

**पठित-अवबोधनम् (पठित अवबोधन)**

13. अधोलिखितं गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नानामुत्तराणि लिखत :

**(अ) गद्यांशः**

अथ एकदा भगवान् बोधिसत्त्वः बहुजन्मार्जितपुण्यफलैः शिवीनां राजा बभूव। सः बालात् एव बृद्धोपसेवी, विनयशीलः शास्त्रपारङ्गतः च आसीत्। जनकल्याणकर्मसु रतः असौ पुत्रवत् प्रजाः पालयति स्म। कारुण्य-औदार्यादिसद्‌गुणोपेतः स नगरस्य समन्ततः धन-धान्यसमृद्धाः दानशालाः अकारयत्। तत्र अर्थिनां समूहः अन्न-पान- वसन-रजत-सुवर्णादिकानि अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत्। राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि जनाः तं देशम् आयान्ति स्म।

**प्रश्नाः**

I. एकपदेन उत्तरत। ½×2 = 1

(i) भगवान् बोधिसत्त्वः केषां राजा बभूव?

(ii) राज्ञः किं श्रुत्वा जनाः तं देशम् आयान्ति स्म?

II. पूर्णवाक्येन उत्तरत। 2×1 = 2

राजा कस्य समन्ततः धन-धान्यसमृद्धाः दानशालाः अकारयत्?

myCBSEguide.com
A Complete guide for CBSE students

III. यथानिर्देशम् उत्तरत। ½×4 = 2

(i) 'अभीष्टानि वस्तूनि' इति पदयोः विशेष्यपदं किम्?

(ii) 'सः बाल्यात् एव विनयशीलः आसीत्।' इति वाक्ये क्रियापदं किम्।

(iii) 'आगच्छन्ति' इति अर्थे अस्मिन् अनुच्छेदे किं क्रियापदं प्रयुक्तम्?

(iv) 'जनाः तं देशम् आयान्ति स्म' इति वाक्ये कर्तृपदं किम्?

**(आ) पद्यांशः**

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।
व्ययतो बृद्धिमायाति क्षयमायाति सञ्चयात्।।

**प्रश्नाः**

I. एकपदेन उत्तरत। ½×2 = 1

(i) सरस्वत्याः कोशः कीदृशः अस्ति?

(ii) सरस्वत्याः कोशः कथं वर्धते?

II. पूर्णवाक्येन उत्तरत। 2×1 = 2

भारत्याः कोशस्य नाशः कथं भवति?

III. यथानिर्देशम् उत्तरत। ½×4 = 2

(i) 'अपूर्वः कोशः' पदयोः विशेषणपदं किम्?

(ii) 'व्ययतः वृद्धिम् आयाति' इति वाक्ये क्रियापदं किम्?

(iii) 'सङ्ग्रहणात्' इति अर्थें अस्मिन् श्लोके किं पदं प्रयुक्तम्?

(iv) 'वृद्धिम्' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम्?

**(इ) नाट्यांशः**

पर्यटनाधिकारी- (ध्वनिविस्तारकयन्त्रस्य समीपम् आगत्य) प्रियच्छात्राः। अभिवन्दनं भवताम् अस्मिन् प्रदेशे। प्रसीदामि यत् भवन्तः अस्य रम्यस्य प्रदेशस्य विषये ज्ञातुम् अति उत्सुकाः। एतदर्थं स्थलानां दर्शनाय प्रबन्धः अपि वर्तते परन्तु सम्प्रति प्रश्नोत्तरमाध्यमेन भवतां जिज्ञासां शमयितुम् इच्छामि। प्रथमं तु अहम् एव एकं प्रश्नं पृच्छामि। अस्य प्रदेशस्य नाम 'अरुणाचलः' कथं जातम्? अनुमीयताम्।

myCBSEguide.com
A Complete guide for CBSE students

हिमांशु- अहं चिन्तयामि यत् 'अरुणः' तु सूर्यस्य पर्यायः। अस्य प्रकाशः सर्वप्रथमम् इमं प्रदेशं स्पृशति। अतः अरुणस्य प्रदेशः अरुणाचलः।

पर्यटनाधिकारी- शोभनम्। उचितम् उक्तम्। हिमाद्रितुङ्गश्रृङ्गैः सुशोभिता सूर्योदयभूमिः इयम्। अतः अरुणाचलः। अस्मिन् प्रदेशे पञ्चाशदधिकाः नद्यः प्रवहन्ति। विपुला च अत्र वनसम्पदा। वनौषधीनां तु अयं स्रोतः एव। पुष्पाणां समृद्धिः सुगन्धिः च मनोहरः। सर्वत्र हरीतिमा। शुद्धपर्यावरणेन युक्तस्य अस्य प्रदेशस्य केवलं प्रकृतिः एव न विविधा मनोहरा च प्रत्युत संस्कृतिः अपि।

प्रश्नाः

I. एकपदेन उत्तरत। ½×2 = 1

(i) अरुणः कस्य पर्यायः?

(ii) अरुणस्य प्रदेशः किं कथ्यते?

II. पूर्णवाक्येन उत्तरत। 1×2 = 2

अरुणाचलप्रदेशे कति नद्यः प्रवहन्ति?

III. यथानिर्देशम् उत्तरत। ½×4 = 2

(i) 'रम्यस्य प्रदेशस्य' इति पदयोः विशेष्यपदं किम्?

(ii) 'अहम् एव एकं प्रश्नं पृच्छामि' इति वाक्ये कर्तृपदं किम्?

(iii) 'उचितम् उक्तम्।' इति वाक्यांशे क्रियापदं किम्?

(iv) 'अनुमानं कुरुत' इति अर्थे अस्मिन् नाट्यांशे किं पदं प्रयुक्तम्?

14. अधोलिखितपद्यद्वयस्य भावार्थम् उपयुक्तपदैः पूरयित्वा पुनः लिखतः 3+3 = 6

(i) कोऽनर्थफलः? मानः, का सुखदा? साधुजनमैत्री।

सर्वव्यसनविनाशे को दक्षः? सर्वथा त्यागी।।

**भावार्थः**

अभिमानेन मनुष्यस्य नाशः भवति (i)-------------------- मनुष्याय सुखं यच्छति।

(ii) ---------------- एव सर्वेषां व्यसनानां विनाशे (iii)---------------- भवति।

myCBSEguide.com
A Complete guide for CBSE students

(ii) असंशयं महाबाहो! मनो दुर्निग्रहं चलम्।

अभ्यासेन तु कौन्तेय, वैराग्येण च गृह्यते।।

**भावार्थः**

हे अर्जुन! निश्चितरूपेण (i) ------------------- चञ्चलम् अस्ति। अस्य निग्रहं दुष्करं परन्तु पुनः पुनः (ii)------------------- एवञ्च (iii) ------------------- मनः वशीकर्तुं शक्यते।

15. अधोलिखितपद्यद्वयस्य अन्वययोः रिक्तस्थानानि पूरयित्वा पुनः लिखतः 1½+1½ = 3

(अ) विद्वांसः एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।

अन्येषां वदने ये तु ते चक्षुर्नामनी मते।।

**अन्वयः**

अस्मिन् लोके (i)---------------- एव चक्षुष्मन्तः प्रकीर्तिताः। अन्येषां (ii)---------------- ये (चक्षुषी) ते तु चक्षुर्नामनी (iii) --------------।

(आ) नानाशास्त्रविदः पूर्वे येऽप्यतीता महारथाः।

नैतदस्त्रं मनुष्येषु तैः प्रयुक्तं कथञ्चन।।

**अन्वयः**

नाना (i)-------------- ये अपि पूर्वे (ii)-------------- अतीताः तैः एतद् अस्त्रं (iii)---------------- न कथञ्चन प्रयुक्तम्।

16. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत। 1x4 = 4

(i) <u>प्रच्छन्नभाग्यः</u> श्रमं कृत्वा धनम् अर्जितवान्।

(ii) सर्वे मिलित्वा <u>गीतं</u> गायन्ति।

(iii) संवत्सरे <u>द्वादश</u> मासाः भवन्ति।

(iv) <u>क्रोधस्य</u> वेगं जित्वा मनुष्यः सुखी भवति।

17. घटनाक्रमानुसारम् अधोलिखितवाक्यानि पुनः लिखत। ½x8 = 4

(i) सूपकाराः तं मेषं ताडयन्ति स्म।

(ii) रसलुब्धाः वानराः राजभवनं न त्यक्तवन्तः।

myCBSEguide.com
A Complete guide for CBSE students

(iii) एकस्य राज्ञः पुत्राः वानरान् भोज्यपदार्थैः पुष्टिं नयन्ति स्म।

(iv) राजा राजवैद्यम् आहूय अश्वरक्षायै न्यवेदयत्।

(v) तत्र एकः मेषः अपि भोजनशालां प्रविश्य यत्किञ्चित् खादति स्म।

(vi) राजवैद्यस्य वचनं श्रुत्वा वानराः अचिन्तयन् 'हा! हताः वयम्।'

(vii) इदं दृष्ट्वा वानरयूथपः वानरान् राजभवनं त्यक्तुम् अकथयत्।

(viii) ज्वलन् मेषः अश्वशालां प्रविशति केचन च अश्वाः दग्धाः।

18. निम्नलिखितवाक्येषु रेखाङ्कितपदानाम् उचितम् अर्थं चित्वा लिखत :

(क) आचार्यात् पादम् आदत्ते।

(i) चरणम्।

(ii) श्लोकम्।

(iii) चतुर्थांशम्।

(ख) मम कलनस्य तु आधारः सूर्यः एव।

(i) गणनायाः

(ii) ध्वनेः

(iii) समयस्य।

(ग) हेयम् अपि च किम्? अकार्यम्।

(i) कार्यं प्रति विमुखता

(ii) अकरणीयं कृत्यम्

(iii) यः कार्यं न करोति।

myCBSEguide.com
A Complete guide for CBSE students

# अंक योजना - संस्कृतम् (सम्प्रेषणाधारितम्)

*निर्धारित समय : 3 घण्टे* | *अधिकतम अंक : 100*

**ध्यातव्यम्**

- अनुच्छेद अथवा श्लोकों पर आधारित प्रश्न अवबोधनात्मक हैं। विद्यार्थी अनुच्छेद में दिए गए शब्दों के स्थान पर पर्यायवाची शब्दों का प्रयोग भी कर सकते हैं इसके लिए भी अंक दिए जाएँ। विद्यार्थी उत्तर देते समय उपयुक्त विभक्ति अथवा वचन का प्रयोग नहीं करते तो अंशतः अंक काटे जाएँ संपूर्ण नहीं।
- त्रुटिपूर्ण वर्तनी अथवा व्याकरणात्मक प्रयोगों के लिए अनुपाततः अंक काटे जाएँ न कि पूरे अंक।
- आंशिक दृष्टि से सही उत्तरों के लिए अंशतः अंक अवश्य दिए जाएँ।
- खण्ड : 'ख' (रचनात्मक-कार्यम्) के अन्तर्गत 'चित्र वर्णन' व अनुच्छेद लेखन' में विकल्प समझा जाए। बच्चों ने जो भाग भी किया हो अंक दिया जाए। वाक्य संरचना प्रमुख है न कि वाक्य का सौंदर्य तत्त्व। आंशिक वाक्य शुद्धता के लिए भी अंक दिए जाएँ।
- किसी भी प्रश्न के विकल्पात्मक उत्तर भी हो सकते हैं। इस अंक योजना में दिए गए उत्तर निर्दशनात्मक है। उनके अतिरिक्त भी सही उत्तर हो सकते हैं अतः अंक दिए जाएँ।

## प्रश्न पत्र संख्या 52/1

**खण्डः 'क'** **15 अङ्काः**

**(अपठित - अवबोधनम्)**

1. अ I एकपदेन उत्तरत - दो प्रश्न। प्रत्येक भाग के लिए ½ अंक। ½x2 = 1

(i) **प्रकाशस्य** (ii) **कमलम्**

II पूर्णवाक्येन उत्तरत - दो प्रश्न। प्रत्येक भाग के लिए एक अंक। 1x2 = 2

(i) **......प्रतीक प्रधाना ....** (ii) **.... मातुः .....**

III यथानिर्देशम् उत्तरत - चार प्रश्न। प्रत्येक भाग के लिए ½ अंक। ½x4 = 2

(i) **स्मरणीया** (ii) **अनेकानि** (iii) **मन्यते** (iv) **प्रकाशस्य**

आ I एकपदेन उत्तरत - दो प्रश्न। प्रत्येक के लिए 1 अंक। 1x2 = 2

(i) **द्राक्षालतां** (ii) **न**

II पूर्णवाक्येन उत्तरत - दो प्रश्न। प्रत्येक के लिए दो अंक 2x2 = 4

(i) **.... उपवने ....** (ii) **.... पुनः पुनः/उपरि-उपरि ....**

III यथानिर्देशम् उत्तरत - चार प्रश्न। प्रत्येक के लिए ½ अंक। ½x4 = 2

(i) **उपवनम्** (ii) **उपरि-उपरि** (iii) **सः/जम्बूकः** (iv) **अनन्तरं**

IV शीर्षकं लिखत **'अम्लानि द्राक्षाफलानि'** अथवा अन्य उपयुक्त शीर्षक। 2

**शीर्षक की शब्द सीमा निर्धारित नहीं है। भाव स्पष्ट होना अनिवार्य है। शीर्षक एक लघु वाक्य में भी हो सकता है।**

## खण्डः 'ख' (रचनात्मकं कार्यम्)

2 पत्रलेखनम् - दस रिक्तस्थान। प्रत्येकभाग के लिए ½ अंक। ½x10 = 5

(i) **श्रीनगरतः** (ii) **प्रियपुत्रि!** (iii) **शुभाशिषः** (iv) **कुशलिनः** (v) **स्मरति**

(vi) **ग्रीष्मावकाशः** (vii) **विश्वसिमि** (viii) **स्वास्थ्यम्** (ix) **पत्रम्** (x) **पिता**

3 रिक्तस्थान पूर्ति द्वारा संवाद-लेखनम् -5 रिक्तस्थान। प्रत्येकभाग के लिए 1 अंक। पूरा वाक्य न लिखने पर भी अंक दिए जाएं।

(i) **अहं किमपि न......** (ii) **दूरतः समागतो.....** (iii) **गत्वा सेवफलं.....** 1x5 = 5

(iv) **अतीव मधुरं.....** (v) **नहि पर्याप्तं**

**4** **<u>चित्रवर्णनम् अथवा अनुच्छेदलेखनम्</u>** 2x5 = 10

बच्चों से सरल, संक्षिप्त वाक्य अपेक्षित है। केवल वाक्य की शुद्धता देखी जाए। इस प्रश्न का प्रमुख उद्देश्य वाक्य रचना है। **वाक्य लघु अथवा दीर्घ हो यह महत्वपूर्ण नहीं। वाक्य आलंकारिक है या नहीं - यह भी महत्वपूर्ण नहीं।** व्याकरणिक दृष्टि से शुद्ध होने पर पूर्ण अंक दिए जाएं। **मंजूषा में दिए गए शब्द सहायतार्थ हैं, बच्चे शब्द चुने अथवा नहीं - आवश्यक नहीं। वे स्वयं शब्दों का प्रयोग कर वाक्य-निर्माण कर सकते हैं।** बच्चे स्वयं भी मंजूषा में दिए गए शब्दों की विभक्तियां आदि भी बदल सकते हैं, अंक दिए जाएं। त्रुटियों के अंक अंशतः काटे जाएं। इस प्रश्न के 10 अंक हैं। प्रत्येक वाक्य के लिए 2 अंक हैं।

अथवा **<u>अनुच्छेदलेखनम्</u>**

यह विकल्प **सबके लिए** माना जाए। बच्चे स्वयं भी मंजूषा में दिए गए शब्दों की विभक्तियां आदि बदल सकते हैं। अंक दिए जाएं। इस प्रश्न के 10 अंक हैं। प्रत्येक वाक्य के लिए 2 अंक हैं।

myCBSEguide.com
A Complete guide for CBSE students

### खण्डः 'ग' (अनुप्रयुक्त-व्याकरणम्)

5 **संधि-संधिच्छेद -** आंशिक दृष्टि से सही उत्तर के लिए आंशिक अंक अवश्य दिए जाएँ। 1x3 = 3

(i) **धनागमनम्** (ii) **सत्/सद् + मित्रं** (iii) **गजश्च**

6 **समास** - इस प्रश्न का मूल उद्देश्य 'समस्तपद' अथवा विग्रह' की समझ है। प्रत्येक के लिए एक अंक है। आंशिक सही उत्तर के लिए भी आंशिक अंक दिए जाएँ। 1x4 = 4

(i) **वनक्षेत्रे** (ii) **क्रोधलोभौ** (iii) **चित्रेण/चित्राभ्यां/चित्रैः सहितम्** (iv) **दश आननानि यस्य सः**

**7** **प्रकृति-प्रत्यय** - संबंधी इस प्रश्न में बच्चे केवल उत्तर लिख सकते हैं। अतः पूर्ण अंक दिए जाएँ। उत्तर विकल्पात्मक हो सकते हैं। **आंशिक सही** उत्तर के लिए आंशिक अंक दिए जाएँ। प्रत्येक भाग के लिए 1 अंक। केवल प्रत्यय जोड़ने पर भी अंक दिए जाएँ। 1x5 = 5

(i) **पठितव्यम्** (ii) **धावन्** (iii) **शक्तिमान्** (iv) **मानवता** (v) **सरला**

**8** **अव्यय** - कुछ वाक्यों में अधिक अव्यय विकल्प रूप में प्रयुक्त हो सकते हैं। अतः अंक दें। प्रत्येक भाग के लिए 1 अंक। 1x5 = 5

(i) **श्वः/यथा** (ii) **यथा** (iii) **मा** (iv) **ह्यः** (v) **कदा/ह्यः**

**9** इस प्रश्न में प्रत्येक रिक्तस्थान के लिए एक अंक है। भावानुसार सही होने पर अंक दिए जाएँ 1x3 = 3

(i) **क्रियते** (ii) **पुस्तकं** (iii) **अहम्**

**10** **समय-संबंधी** इस प्रश्न में वर्तनी अथवा समस्तपद की ओर ध्यान न दिया जाए। आंशिक सही होने पर भी आंशिक अंक दिए जाएँ। 1x4 = 4

(i) **सार्ध-दश** (ii) **पादोन एकादश** (iii) **सपाद एकादश** (iv) **चतुर्**

यदि बच्चे वादने शब्द का प्रयोग नहीं करते हैं तो इस ओर ध्यान नहीं दिया जाए।

**11** **संख्या-संबंधी** इस प्रश्न में वर्तनी अथवा समस्तपद की ओर ध्यान न दिया जाए। आंशिक सही होने पर भी आंशिक अंक दिए जाएँ। प्रत्येक के लिए ½ अंक। ½x4 = 2

(i) **द्वौ** (ii) **एका** (iii) **षष्टिः** (iv) **पञ्च**

**12** **वाक्य-संबंधी** इस प्रश्न में बच्चे केवल उत्तर लिख सकते हैं। पूर्ण अंक दिए जाएँ। आंशिक सही होने पर भी आंशिक अंक दिए जाएँ। वाक्य की शुद्धता प्रमुख है लकार आदि नहीं। 1x4 = 4

(i) **पठतः** (ii) **ताः** (iii) **लिखामि** (iv) **अगच्छत्**

myCBSEguide.com
A Complete guide for CBSE students

## खण्डः 'घ' (पठित-अवबोधनम्)

13 इस प्रश्न का मूल उद्देश्य **अवबोधन** परीक्षण है। बच्चे **पर्यायवाची** शब्दों का प्रयोग कर सकते हैं। पूर्ण अंक दिए जाएँ। आंशिक सही होने पर भी आंशिक अंक दिए जाएँ।

(अ) **गद्यांशः**

I एकपदेन उत्तरत - दो प्रश्न। प्रत्येक के लिए ½ अंक। ½x2 = 1

(i) **प्रच्छन्नभाग्यस्य** (ii) **सुवर्णपूरितः**

II पूर्णवाक्येन उत्तरत - एक प्रश्न के लिए दो अंक। 2

(i) ..... **नाथ! विरम अस्माद् लोभात्** .......

III यथानिर्देशम् उत्तरत - चार प्रश्न। प्रत्येक के लिए ½ अंक। ½x4 = 2

(i) **विचित्रः** (ii) **विद्यते** (iii) **परद्रव्ये** (iv) **सा/पत्नी**

(आ) **पद्यांशः**

I एकपदेन उत्तरत - दो प्रश्न। प्रत्येक के लिए 1 अंक। 1x2 = 2

(i) **पुरुषं** (ii) **शीतला**

II पूर्णवाक्येन उत्तरत - एक प्रश्न के लिए 1 अंक। 2

..... **प्रह्लादयति पुरुषं**

III यथानिर्देशम् उत्तरत - चार प्रश्न। प्रत्येक के लिए ½ अंक। ½x4 = 2

(i) **शीतला** (ii) **प्रह्लादयति** (iii) **वाणी** (iv) **शीतलसलिलं**

(इ) **नाट्यांशः**

I एकपदेन उत्तरत - चार प्रश्न। प्रत्येक के लिए ½ अंक। ½x2 = 1

(i) **मयूरः** (ii) **प्रकृतेः**

II पूर्णवाक्येन उत्तरत - एक प्रश्न के लिए दो अंक। 2

(i) ......**केकारवं** ........ **कोकिलः** .................

III यथानिर्देशम् उत्तरत - चार प्रश्न। प्रत्येक के लिए ½ अंक। ½x4 = 2

(i) **अपूर्वः** (ii) **जानाति** (iii) **मयूराय** (iv) **विधात्रा**

myCBSEguide.com
A Complete guide for CBSE students

14 <u>**भाव-संबंधी**</u> इस प्रश्न में बच्चे श्लोक में से उत्तर चुन सकते हैं अथवा **पर्यायवाची** शब्दों का प्रयोग कर सकते हैं। पूर्ण अंक दिए जाएँ। बच्चे केवल उत्तर लिख सकते हैं। 1x6 = 6

I (i) **सुखानि** अथवा मिलता-जुलता शब्द

(ii) **परेभ्यः** अथवा मिलता-जुलता शब्द

(iii) **कर्म** अथवा मिलता जुलता शब्द

II (i) **प्राणिगणः** अथवा मिलता-जुलता शब्द

(ii) **वशे** अथवा मिलता-जुलता शब्द

(iii) **स्थातव्यं** अथवा मिलता-जुलता शब्द

15 <u>**अन्वय-संबंधी**</u> इस प्रश्न में बच्चे श्लोक में से उत्तर चुन सकते हैं। बच्चे केवल उत्तर लिख सकते हैं।

I (i) **हितं** (ii) **विपरीतोपसेविनः** (iii) **रिपवः** ½x6 = 3

II (i) **तात** (ii) **मानुषेषु** (iii) **प्रयोक्तव्यं**

16 <u>**प्रश्ननिर्माण-संबंधी**</u> इस प्रश्न में बच्चे केवल प्रश्नवाचक शब्द लिख सकते हैं। व्याकरण वर्तनी आदि की दृष्टि से अनुपाततः अंक काटे जाएँ न कि पूर्ण। इस प्रश्न में अवबोधन प्रश्न है।/हो सकते हैं। 1x4 = 4

(i) **कस्य** (ii) **कति** (iii) **कस्मात्** (iv) **कान्** अन्य सार्थक शब्द भी हो सकते हैं।

17 <u>**कथाक्रम-संबंधी**</u> इस प्रश्न के उत्तर में वाक्यों में तार्किक संबंध हो। प्रश्न बोधात्मक हैं स्मृति आधारित नहीं। केवल वाक्यक्रम लिखने पर भी अंक दिए जाएँ। वर्तनी आदि द्रष्टव्य नहीं। ध्यान रखें नीचे दिया गया क्रम केवल निदेशात्मक है। ½x8 = 4

(ii) ⟶ (vi) ⟶ (iii) ⟶ (vii)

(viii) ⟶ (v) ⟶ (iv) ⟶ (i)

**यह सामान्य क्रम है। अन्य तार्किक क्रम होने पर भी अंक दिए जाएँ।** आंशिक **उत्तर के लिए भी अंक दिए जाएँ।**

18 <u>**शब्दार्थ-संबंधी**</u> इस प्रश्न में बच्चे केवल क्रमसंख्या लिख सकते हैं अंक दिए जाएँ। वर्तनी आदि की दृष्टि से अंक अंशतः ही काटे जाएँ। प्रत्येक भाग के लिए 1 अंक 1x3 = 3

(i) **श्रवणमधुरता**

(ii) **सज्जनानां मित्रता**

(iii) **साहसम्**

myCBSEguide.com
A Complete guide for CBSE students

## प्रश्न पत्र संख्या 52

### खण्डः 'क'

### (अपठित - अवबोधनम्)

1. अ I एकपदेन उत्तरत - दो प्रश्न। प्रत्येक भाग के लिए ½ अंक। ½x2 = 1

(i) **जनानाम्** (ii) **शिक्षा**

II पूर्णवाक्येन उत्तरत - दो प्रश्न। प्रत्येक भाग के लिए एक अंक। 1x2 = 2

(i) **......प्रत्येकं जनस्य ....** (ii) **.... शिक्षां विना .....**

III यथानिर्देशम् उत्तरत - चार प्रश्न। प्रत्येक भाग के लिए ½ अंक। ½x4 = 2

(i) **प्रमुखं** (ii) **कथ्यते** (iii) **लोकतन्त्रं** (iv) **दोषाणाम्**

आ I एकपदेन उत्तरत - दो प्रश्न। प्रत्येक के लिए 1 अंक। 1x2 = 2

(i) **कम्बलान्** (ii) **सज्जनाः/आश्चर्यचकिताः**

II पूर्णवाक्येन उत्तरत - दो प्रश्न। प्रत्येक के लिए दो अंक 2x2 = 4

(i) **.... 'मगधदेशस्य नृपस्य'/नृपस्य ....** (ii) **.... भूमौ ....**

III यथानिर्देशम् उत्तरत - चार प्रश्न। प्रत्येक के लिए ½ अंक। ½x4 = 2

(i) **कम्बलाः** (ii) **बहिः** (iii) **द्रव्यस्य** (iv) **चौराः**

IV शीर्षकं लिखत **'महान् चाणक्यः'/'चाणक्यस्य संदेशः'/'धर्मः अधर्मश्च'** अथवा अन्य उपयुक्त शीर्षक। 1×2=2

शीर्षक की शब्द सीमा निर्धारित नहीं है। भाव स्पष्ट होना अनिवार्य है। शीर्षक एक लघु वाक्य में भी हो सकता है।

### खण्डः 'ख' (रचनात्मकं कार्यम्)

2 पत्रलेखनम् - दस रिक्तस्थान। प्रत्येकभाग के लिए ½ अंक। ½x10 = 5

(i) **छात्रावासतः** (ii) **प्रिय अनुज!** (iii) **शुभाशिषः** (iv) **कुशलिनः**

(v) **दत्तचित्तेन** (vi) **अस्ति** (vii) **अभ्यासम्** (viii) **ज्ञातम्**

(ix) **विषयेषु** (x) **अग्रजः**

myCBSEguide.com
A Complete guide for CBSE students

3 रिक्तस्थान संवाद-लेखनम् -5 रिक्तस्थान। प्रत्येकभाग के लिए 1 अंक। पूरा वाक्य न लिखने पर भी अंक दिए जाएं।

(i) **किं शीतलं जलं....** (ii) **अधुना न। किंचित् कालः** (iii) **सदैव निर्माति.....** 1x5 = 5

(iv) **भवती निर्दिशतु .....** (v) **हुँ, भवता। किं भवान् .....**

**4** **<u>चित्रवर्णनम् अथवा अनुच्छेदलेखनम्</u>** 2x5 = 10

बच्चों से सरल, संक्षिप्त वाक्य अपेक्षित है। केवल वाक्य की शुद्धता देखी जाए। इस प्रश्न का प्रमुख उद्देश्य वाक्य रचना है। **वाक्य लघु अथवा दीर्घ हो यह महत्वपूर्ण नहीं। वाक्य आलंकारिक है या नहीं - यह भी महत्वपूर्ण नहीं।** व्याकरणिक दृष्टि से शुद्ध होने पर पूर्ण अंक दिए जाएं। **मंजूषा में दिए गए शब्द सहायतार्थ हैं, बच्चे शब्द चुने अथवा नहीं - आवश्यक नहीं। वे स्वयं शब्दों का प्रयोग कर वाक्य-निर्माण कर सकते हैं।** बच्चे स्वयं भी मंजूषा में दिए गए शब्दों की विभक्तियां आदि भी बदल सकते हैं, अंक दिए जाएं। त्रुटियों के अंक अंशतः काटे जाएं। इस प्रश्न के 10 अंक हैं। प्रत्येक वाक्य के लिए 2 अंक हैं।

अथवा **<u>अनुच्छेदलेखनम्</u>**

यह विकल्प **सबके लिए** माना जाए। बच्चे स्वयं भी मंजूषा में दिए गए शब्दों की विभक्तियां आदि बदल सकते हैं। अंक दिए जाएं। इस प्रश्न के 10 अंक हैं। प्रत्येक वाक्य के लिए 2 अंक हैं।

**खण्डः 'ग' (अनुप्रयुक्त-व्याकरणम्)**

5 **संधि-संधिच्छेद -** आंशिक दृष्टि से सही उत्तर के लिए आंशिक अंक अवश्य दिए जाएँ। 1x3 = 3

(i) **देशान्तरेभ्यः/देशान्तरेभ्यो + अपि** (ii) **वाङ्.मयस्य** (iii) **बालस्तत्र**

6 **<u>समास</u>** - इस प्रश्न का मूल उद्देश्य 'समस्तपद' अथवा विग्रह' की समझ है। प्रत्येक के लिए एक अंक है। आंशिक सही उत्तर के लिए भी आंशिक अंक दिए जाएँ। 1x4 = 4

(i) **विद्यालयभवने** (ii) **माता च पिता च** (iii) **शक्तिम् अनतिक्रम्य** (iv) **बहुफलः**

**7** **<u>प्रकृति-प्रत्यय</u>** - संबंधी इस प्रश्न में बच्चे केवल उत्तर लिख सकते हैं। अतः पूर्ण अंक दिए जाएँ। उत्तर विकल्पात्मक हो सकते हैं। **आंशिक सही** उत्तर के लिए आंशिक अंक दिए जाएँ। प्रत्येक भाग के लिए 1 अंक। केवल प्रत्यय जोड़ने पर भी अंक दिए जाएँ। 1x5 = 5

(i) **कर्तव्यम्** (ii) **चलन्** (iii) **बुद्धिमान्** (iv) **विशालत्वं** (v) **श्रीमती**

8 **अव्यय** - कुछ वाक्यों में अधिक अव्यय विकल्प रूप में प्रयुक्त हो सकते हैं। अतः अंक दें। प्रत्येक भाग के लिए 1 अंक। 1x5 = 5

(i) **श्वः/तदा/बहिः** (ii) **बहिः** (iii) **तदा** (iv) **ह्यः/तदा/बहिः** (v) **विना**

9 इस प्रश्न में प्रत्येक रिक्तस्थान के लिए एक अंक है। भावानुसार सही होने पर अंक दिए जाए 1x3 = 3

(i) **लिखसि** (ii) **मया** (iii) **पत्रम्**

10 **समय-संबंधी** इस प्रश्न में वर्तनी अथवा समस्तपद की ओर ध्यान न दिया जाए। आंशिक सही होने पर भी आंशिक अंक दिए जाएँ। 1x4 = 4

(i) **एकादश** (ii) **सपाद एकादश** (iii) **पादोन द्वादश** (iv) **सार्धचतुर्**

यदि बच्चे वादने शब्द का प्रयोग नहीं करते हैं तो इस ओर ध्यान नहीं दिया जाए।

11 **संख्या-संबंधी** इस प्रश्न में वर्तनी अथवा समस्तपद की ओर ध्यान न दिया जाए। आंशिक सही होने पर भी आंशिक अंक दिए जाएँ। प्रत्येक के लिए ½ अंक। ½x4 = 2

(i) **त्रयः** (ii) **एका** (iii) **चत्वारिंशत्** (iv) **पञ्च**

12 **वाक्य-संबंधी** इस प्रश्न में बच्चे केवल उत्तर लिख सकते हैं। पूर्ण अंक दिए जाएँ। आंशिक सही होने पर भी आंशिक अंक दिए जाएँ। वाक्य की शुद्धता प्रमुख है लकार आदि नहीं। 1x4 = 4

(i) **पठन्ति** (ii) **सा** (iii) **गच्छथ** (iv) **गमिष्यति**

**खण्डः 'घ' (पठित-अवबोधनम्)**

13 इस प्रश्न का मूल उद्देश्य **अवबोधन** परीक्षण है। बच्चे **पर्यायवाची** शब्दों का प्रयोग कर सकते हैं। पूर्ण अंक दिए जाएँ। आंशिक सही होने पर भी आंशिक अंक दिए जाएँ।

(अ) **गद्यांशः**

I एकपदेन उत्तरत - दो प्रश्न। प्रत्येक के लिए ½ अंक। ½x2 = 1

(i) **शिवीनाम्** (ii) **दानशीलताम्**

II पूर्णवाक्येन उत्तरत - एक प्रश्न के लिए दो अंक। 2

(i) **..... नगरस्य समन्ततः .......**

III यथानिर्देशम् उत्तरत - चार प्रश्न। प्रत्येक के लिए ½ अंक। ½x4 = 2

(i) **वस्तूनि** (ii) **आसीत्** (iii) **आयान्ति** (iv) **जनाः**

myCBSEguide.com
A Complete guide for CBSE students

(आ) **पद्यांशः**

I एकपदेन उत्तरत - दो प्रश्न। प्रत्येक के लिए 1 अंक। 1x2 = 2

(i) **अपूर्वः** (ii) **व्ययतः/व्ययात्**

II पूर्णवाक्येन उत्तरत - एक प्रश्न के लिए 1 अंक। 2

**..... सञ्चयात् .....**

III यथानिर्देशम् उत्तरत - चार प्रश्न। प्रत्येक के लिए ½ अंक। ½x4 = 2

(i) **अपूर्वः** (ii) **आयाति** (iii) **सञ्चयात्** (iv) **क्षयम्**

(इ) **नाट्यांशः**

I एकपदेन उत्तरत - चार प्रश्न। प्रत्येक के लिए ½ अंक। ½x2 = 1

(i) **सूर्यस्य** (ii) **अरुणाचलः**

II पूर्णवाक्येन उत्तरत - एक प्रश्न के लिए दो अंक। 2

(i) **...... पञ्चाशदधिकाः ................**

III यथानिर्देशम् उत्तरत - चार प्रश्न। प्रत्येक के लिए ½ अंक। ½x4 = 2

(i) **प्रदेशस्य** (ii) **अहं** (iii) **उक्तं** (iv) **अनुमीयताम्**

14 **भाव-संबंधी** इस प्रश्न में बच्चे श्लोक में से उत्तर चुन सकते हैं अथवा **पर्यायवाची** शब्दों का प्रयोग कर सकते हैं। पूर्ण अंक दिए जाएँ। बच्चे केवल उत्तर लिख सकते हैं। 1x6 = 6

I (i) **साधुजनमैत्री** अथवा मिलता-जुलता शब्द

(ii) **त्यागी** अथवा मिलता-जुलता शब्द

(iii) **दक्षः** अथवा मिलता जुलता शब्द

II (i) **मनः** अथवा मिलता-जुलता शब्द

(ii) **अभ्यासेन** अथवा मिलता-जुलता शब्द

(iii) **वैराग्येण** अथवा मिलता-जुलता शब्द

15 **अन्वय-संबंधी** इस प्रश्न में बच्चे श्लोक में से उत्तर चुन सकते हैं। बच्चे केवल उत्तर लिख सकते हैं।

I (i) **विद्वांसः** (ii) **वदने** (iii) **मते** ½x6 = 3

II (i) **शास्त्रविदः** (ii) **महारथाः** (iii) **मनुष्येषु**

myCBSEguide.com
A Complete guide for CBSE students

16 **प्रश्ननिर्माण-संबंधी** इस प्रश्न में बच्चे केवल प्रश्नवाचक शब्द लिख सकते हैं। व्याकरण वर्तनी आदि की दृष्टि से अनुपाततः अंक काटे जाएँ न कि पूर्ण। इस प्रश्न में अवबोधन प्रमुख है। तथा विकल्पात्मक उत्तर हो सकते हैं। 1x4 = 4

(i) **कः** (ii) **किं** (iii) **कति** (iv) **कस्य** अन्य सार्थक शब्द भी हो सकते हैं।

17 **कथाक्रम-संबंधी** इस प्रश्न के उत्तर में वाक्यों में तार्किक संबंध हो। प्रश्न बोधात्मक हैं स्मृति आधारित नहीं। केवल वाक्यक्रम लिखने पर भी अंक दिए जाएँ। वर्तनी आदि द्रष्टव्य नहीं। ध्यान रखें नीचे दिया गया क्रम केवल निदेशात्मक है। ½x8 = 4

(iii) ⟶ (v) ⟶ (i) ⟶ (vii)

(ii) ⟶ (viii) ⟶ (iv) ⟶ (vi)

**यह सामान्य क्रम है। अन्य तार्किक क्रम होने पर भी अंक दिए जाएँ।** आंशिक **उत्तर के लिए भी अंक दिए जाएँ।**

18 **शब्दार्थ-संबंधी** इस प्रश्न में बच्चे केवल क्रमसंख्या लिख सकते हैं अंक दिए जाएँ। वर्तनी आदि की दृष्टि से अंक अंशतः ही काटे जाएँ। प्रत्येक भाग के लिए 1 अंक 1x3 = 3

(i) **चतुर्थांशम्**

(ii) **गणनायाः**

(iii) **अकरणीयं कृत्यं**